# Master of Arts Examination, 2017

(2nd Year 3rd Semester)

**SANSKRIT**

**Course : XI**

**[Sanskrit Prose]**

Time : Two Hours Full Marks : 30

*The figures in the margin indicate full marks.*

## क – विभागः

## (चम्पूरामायणम्)

१. सुरगिरा देवनागर्या लिप्या **पञ्च** प्रश्नाः समाधेयाः। 1×5=5

(क) तदनु शूलमखण्डयदञ्जसा — अखण्डयद् इति क्रियायाः कर्ता कः? अञ्जसा इत्यस्य पर्यायः दीयताम्।

(ख) वपुरस्य ... ... श्वभ्रे तदक्षिपद् इषुप्रहतं स रामः — कस्य वपुः? किं विचिन्त्य रामः उद्दिष्टं कर्म अकरोत्?

(ग) क आसीत् सुबाहुः? कस्तं जघान?

(घ) नहुषः केन हेतुना भुजङ्गभावं प्राप्तः?

(ङ) अयि कवलय माम् अमू विमुञ्च-रेखाङ्कितपदैः केषां परामर्शः?

(च) अगस्त्यः कयोः "गाधतागाधतातस्कर" आसीत्?

(छ) अगस्त्याश्रमे सल्लकीवृक्षः केन हेतुन नियमितशाखः संवृत्तः?

[*Turn over*]

२. सुरगिरा देवनागर्या लिप्या **पदपञ्चकस्य** अर्थाः देयाः। 1×5=5

सशरासनः, शापव्यापदम्, वृषस्यन्ती, खरपरुषि, नानानोकनिवहेन, कुतस्त्यौ, शिलीमुखान्, पिशितभुजम्, परिरम्भणम्, वलन्ते।

३. चम्पूरामायणम् अनुसृत्य हेमन्तकालः केषां कृते सुभगंकर इति वर्ण्यताम्। 5

**अथवा,**

अधोलिखितस्य श्लोकस्य छन्दोऽलंकारश्च निर्णीयेताम्।

अस्मिन् महापथधिया वदनं विगाह्य निर्गन्तुमक्षमतया जठरे लुठद्भिः।

वन्यैर्गजैरजगराः पिशिताशनेभ्यो वातापिदानवदशामुप देशयन्ति।।

**ख–विभागः**

**(हर्षचरितम्)**

४. सुरगिरा देवनागर्या लिप्या **पञ्च** प्रश्नाः समाधेयाः। 1×5=5

(क) उदीच्येषु प्रतीच्येषु च कीदृशं काव्यं समादृतम्?

(ख) भट्टारहरिचन्द्रकृतगद्यबन्धस्य नृपस्य च सामान्यधर्मेषु द्वौ उल्लिख्येताम्।

(ग) प्रवरसेनराजस्य कीर्तिः किमाश्रित्य सागरस्य परं पारं प्रयाता? सुग्रीवपक्षे प्रवरसेन इति शब्दः व्युत्पाद्यताम्।

(घ) हर्षवर्धनः जनयितुरायुष्कामः किमकरोत्?

(ङ) नग्नाटकस्य किं लाञ्छनमासीत्? केन कारणेन स कज्जलमय इव इति उत्प्रेक्ष्यते?

[*Turn over*]

(च) शोकाकुले स्कन्धावारे नवसेवकाः केन हेतुना विकला आसन्?

(छ) यमपट्टिकस्य हस्तद्वयेन किं वस्तुद्वयं विधृतम् आसीत्?

५. हर्षचरितस्य प्रारम्भश्लोकेषु आख्यायिकाप्रशंसा यथा उपलभ्यते तथा स्वकीयशैल्या उच्यताम्। 5

**अथवा,**

राजकुले बाह्यपरिजनाः पीडितस्य पार्थिवस्य अवस्थां कथं वर्णयन्ति स्म?

६. सुरगिरा देवनागर्या अर्था लेखनीयाः। 5

प्रतिपादकैः (आख्यायिकापक्षे), अग्राम्यम् (कोशपक्षे), समुद्दीपितकन्दर्पा (बृहत्कथापक्षे), आराध्यमानाहिर्बुध्नम्, विद्राणविपश्चिति।

**अथवा,**

दाहज्वराक्रान्त-प्रभाकरवर्धनस्य पीडोपशमनार्थम् औषधस्य पथ्यस्य च का व्यवस्था कृता?

---